International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(5): 96-98
© 2026 IJMH
www.themultijournal.com
Received: 18-09-2026
Accepted: 05-10-2026
Publish : 06-10-2026

**बाबुला प्रधान:**
शिक्षाशास्त्रीय शोधच्छात्रः,
रा. सं.विश्वविद्यालयः,तिरुपतिः (आ.प्र)

**Correspondence:**
**बाबुला प्रधान:**
शिक्षाशास्त्रीय शोधच्छात्रः,
रा. सं.विश्वविद्यालयः,तिरुपतिः (आ.प्र)

# नारीसशक्तीकरणे सावित्रीबाईफुले-पण्डितारमाबायोः योगदानस्य तुलनात्मकमध्ययनम्

**A Comparative Study of the Contributions of Savitribai Phule and Pandita Ramabai to Women's Empowerment**

**बाबुला प्रधान:**

## १. शोधसारः (Abstract)

भारतीयसमाजस्य इतिहासपरम्परायां नारीणां स्थानमतीव महत्त्वपूर्णमस्ति। तथापि सामाजिक-कुरीतीनां, निरक्षरतायाः, बालविवाहस्य, वैधव्यसमस्यायाः, जातिभेदभावस्य तथा च लैङ्गिक-वैषम्यस्य कारणात् दीर्घकालं यावत् नारीणां सामाजिकोत्कर्षः रुद्धः अभवत्। एकोनविंशतितमे शतके भारतस्य सामाजिकपरिवर्तनस्य यात्रायाम् अनेकैः समाज-संस्कारकैः महत्त्वपूर्णं योगदानं कृतम्। तेषु सावित्रीबाईफुले तथा च पण्डितारमाबाई इति द्वे समाजसंस्कारिके प्रमुखे स्तः। उभेऽपि नारीशिक्षायाः प्रसारं, नारीणां सामाजिक-प्रतिष्ठां, नारीसशक्तीकरणम् तथा चाधिकारजागरूकतां परमावश्यकीं मन्येते स्म।

सावित्रीबाई-फुले बालिकानां शिक्षायाः प्रसारे, सामाजिकसमतायाः समर्थने तथा च वञ्चितवर्गाणाम् उन्नतौ महत्त्वपूर्णं योगदानं कृतवती। अपरञ्च, पण्डितारमाबाई तु नारीशिक्षायाः, विशेषतः विधवानां तथा च सामाजिकदृष्ट्या तिरस्कृतानां नारीणां शिक्षायाः, पुनर्वासस्य तथा च नारीसशक्तीकरणस्य दिश्युल्लेखनीयं कार्यमकरोत्। अस्मिन्लेखे उभयोः योगदानस्य शिक्षाक्षेत्रे, समाजसंस्कारक्षेत्रे, नारीअधिकारक्षेत्रे तथा चात्मनिर्भरतादृष्ट्या तुलनात्मकमध्येयनं क्रियते। तयोः कार्ययोः साम्यं वैषम्यं च विमृश्य आधुनिकसमाजे तयोः अवदानस्य प्रासङ्गिकतापि प्रतिपाद्यते।

**मुख्यबिन्दवः-** सावित्रीबाई-फुले, पण्डितारमाबाई, नारीसशक्तीकरणम्, नारीशिक्षा, समाज-संस्कारः, नारी-अधिकारः, आत्मनिर्भरता।

## २. उपोद्घातः (Introduction)

भारतीयसमाजे नारीणां भूमिका प्राचीनकालादेवातीव महत्त्वपूर्ण्यासीत्। परिवारस्य, संस्कृतेः, शिक्षायाः तथा च सामाजिकजीवनस्य विकासे नारीणाम् अवदानं सदा विद्यमानम् आसीत्। तथापि इतिहासस्य विभिन्नेषु कालखण्डेषु नारीणां सामाजिकस्थितौ परिवर्तनं स्पष्टं दृश्यते । विशेषतः एकोनविंशतितमे शतके भारतीयसमाजस्य बहुषु प्रदेशेषु नारीशिक्षायाः अवसराः अत्यल्पत्वात् सीमिताः आसन्। बालविवाहः, विधवानाम् शोचनीयावस्था, सामाजिककुरीतयः, जातिभेदभावः तथा च पितृसत्तात्मकव्यवस्था नारीणां सम्यग्-विकासस्य प्रमुखाः बाधकाः आसन्। एतादृशे सामाजिके परिवेशे समाजसंस्कर्त्रीणां भूमिका विशेषतोऽतीव महत्त्वपूर्ण्याभवत्। सावित्रीबाई-फुले तथा च पण्डितारमाबाई इति द्वे नार्यौ नारीणां जीवनदशायां परिवर्तनमानेतुं सततम् यत्नमकुरुताम्। तयोः कार्यस्य केन्द्रे नारीशिक्षा, समाजसंस्कारः, नारीप्रतिष्ठा तथा च नारीसशक्तीकरणम् इत्यादयो विषयाः प्रमुखा आसन्।

सावित्रीबाई फुले भारतस्य प्रारम्भिकासु नारीशिक्षिकासु प्रमुखा आसीत्। तया बालिकानां शिक्षायाः प्रसाराय महत्त्वपूर्णं कार्यं कृतम्। पण्डितारमाबाई अपि नारीशिक्षायाः तथा च नारीणां सामाजिकाधिकाराणां दृढसमर्थिका आसीत्। तया विशेषतो विधवानां तथा च वञ्चितनारीणां कृते शिक्षा, आश्रयः तथा च पुनर्वासस्यावसरा निर्मिताः। अत उभयोः समाजसंस्कर्त्र्योः अवदानस्य तुलनात्मकमध्ययनं भारतीयनारीसशक्तीकरणस्य ऐतिहासिक-विकासं ज्ञातुमतीव महत्त्वपूर्णमस्ति।

**३. नारीसशक्तीकरणस्य अवधारणा**

नारीसशक्तीकरणम् इत्यस्य सामान्यः अर्थः अस्ति- नारीणां स्वजीवनसम्बद्धेषु निर्णयेषु सहभागिता, शिक्षायाः तथा च समानावसराणां प्राप्तिः, आर्थिक-आत्मनिर्भरता, सामाजिकप्रतिष्ठा, अधिकारजागरूकता तथा च आत्मविश्वासस्य विकासः। नारीसशक्तीकरणं केवलं नारीणां कृते अधिकारप्रदानपर्यन्तं सीमितं न भवति। नारी स्वस्य अधिकारान् ज्ञातुम्, निर्णयान् स्वतन्त्रतया कर्तुम्, सामाजिकजीवन सहभागितां विधातुम् तथा च आत्मनिर्भरं जीवनं यापयितुं समर्था भवेत्- एषः नारीसशक्तीकरणस्य व्यापकः अर्थः अस्ति। शिक्षा नारीसशक्तीकरणस्य प्रमुखः आधारः अस्ति। शिक्षया नारी स्वस्याधिकारांश्च कर्तव्यानि च ज्ञातुं शक्नोति। शिक्षा तस्या आत्मविश्वासं वर्धयति तथा च सामाजिकार्थीक-क्षेत्रेषु सहभागितायां अवसरं प्रददाति। सावित्रीबाई-फुले तथा च पण्डिता-रमाबाई इति द्वयोः कार्येष्वेषा धारणा स्पष्टतया दृश्यते।

**४. सावित्रीबाई फुले-महोदयायाः योगदानम्**

**४.१ शिक्षाक्षेत्रे योगदानम्**

सावित्रीबाई फुले नारीशिक्षायाः इतिहासपरम्परायां महत्त्वपूर्णं स्थानं भजते । ज्योतिरावफुलेमहोदयेन सह तया बालिकानां शिक्षायै विद्यालयस्थापनादिषु कार्येषु सक्रियतया सहभागिता कृता। तस्याः दृष्टौ नारीशिक्षा केवलं व्यक्तिगतज्ञानस्य साधनं नासीत्, अपितु समाजपरिवर्तनस्य शक्तिशाली माध्यमम् अपि आसीत्। तया बालिकानां कृते शिक्षायाः अवसरान् विस्तृतं कर्तुं सततम् यत्नः कृतः। तस्याः कार्यम् तत्कालीन-सामाजिक कुरीतीनां सन्दर्भे अतीव महत्त्वपूर्णम् आसीत्, यतः बालिकानां शिक्षां प्रति समाजस्य सर्वेषां वर्गाणां समाना दृष्टिः नासीत्। सावित्रीबाई फुले शिक्षया नारीणाम् आत्मविश्वासः वर्धते, ताः स्वनिर्णयं कर्तुं समर्थाः भवन्ति तथा च समाजस्य विकासे सक्रियतया योगदानं दातुं शक्नुवन्ति इति भावनां कार्यरूपेण प्रदर्शितवती।

**४.२ सामाजिकसुधारक्षेत्रे योगदानम्**

सावित्रीबाई फुले सामाजिकसमतायाः दृढसमर्थिका आसीत्। सा जातिभेदभावस्य तथा च लैङ्गिकवैषम्यस्य विरोधे कार्यम् अकरोत्। तस्याः सामाजिकदृष्टौ प्रत्येकस्य मानवस्य प्रतिष्ठा समाना भवेत् इति मूलभावना आसीत्। नारीणां तथा च सामाजिकदृष्ट्या वञ्चितानां वर्गाणां समस्याः तया समीपतः अनुभूताः। अतः तस्याः समाज-संस्कारकार्यं केवलं नारीशिक्षापर्यन्तं सीमितं नासीत्, अपितु व्यापकसामाजिकसमतायाः उद्देश्येन सम्बद्धम् आसीत्।

**४.३ महिलाधिकारक्षेत्रे योगदानम्**

सावित्रीबाई फुले नारीणाम् आत्मसम्मानस्य तथा च प्रतिष्ठापूर्ण जीवनस्य दृढ-समर्थिका आसीत्। तस्याः कार्ये नारीणां शिक्षायाः, सामाजिकप्रतिष्ठायाः तथा च स्वनिर्णय-क्षमतायाः महत्त्वं स्पष्टतया दृश्यते। तस्याः विचाराः नारीणां सामाजिकस्थितौ परिवर्तनं आनेतुं प्रेरणादायकाः आसन्। शिक्षा तथा च सामाजिकः जागरूकता नारीणाम् अधिकार-प्राप्तेः महत्त्वपूर्णे साधने इति तया स्वकार्येण प्रदर्शितम्।

**५. पण्डिता रमाबाई-महोदयायाः योगदानम्**

**५.१ शिक्षाक्षेत्रे योगदानम्**

पण्डिता रमाबाई भारतस्य प्रमुखासु समाजसंस्कर्त्रीषु अन्यतमा आसीत्। सा नारीशिक्षायाः महत्त्वं प्रतिपादितवती। विशेषतः विधवानां तथा च सामाजिकदृष्ट्या वञ्चितानां नारीणां कृते शिक्षायाः अवसरनिर्माणे तस्याः कार्यम् अतीव महत्त्वपूर्णम् आसीत्। रमाबाई-महोदयायाः दृष्टौ शिक्षा नारीणाम् आत्मनिर्भरजीवनस्य आधारः आसीत्। अतः तया शिक्षया सह व्यावहारिककौशलस्य तथा च नारीसशक्तीकरणस्य आवश्यकताम् अपि महत्त्वं दत्तम्।

**५.२ सामाजिकसुधारक्षेत्रे योगदानम्**

पण्डिता रमाबाई विधवानां तथा च अन्यासां वञ्चितनारीणां सामाजिकस्थितेः विषये गम्भीरतया चिन्तितवती। तत्कालीनसमाजे विधवानां जीवनम् अनेकैः सामाजिकप्रतिबन्धैः प्रभावितम् आसीत्। रमाबाई तासां कृते शिक्षां, आश्रयं तथा च पुनर्वासस्य अवसरान् प्रदातुं सततं प्रयत्नं कृतवती। 'शारदा-सदनम्' इत्यादीनाम् संस्थात्मकप्रयत्नानां माध्यमेन तया नारीणां जीवनस्य पुनर्निर्माणाय कार्यं कृतम्। तस्याः समाजसंस्कारकार्यं नारीणां केवलं संरक्षणात्परं तासाम् आत्मनिर्भरजीवननिर्माणेन सम्बद्धम् आसीत्।

**५.३ महिलाधिकारक्षेत्रे योगदानम्**

पण्डिता रमाबाई नारीणां प्रतिष्ठापूर्णजीवनस्य अधिकारस्य दृढसमर्थिका आसीत्। सा नारीशिक्षा, स्वतन्त्रचिन्तनम् तथा च नारीसशक्तीकरणम् इत्येतेषाम् अवश्यकताम् महत्त्वं च प्रतिपादितवती। तस्याः कार्ये नार्यः केवलं सामाजिक-व्यवस्थायाः आश्रिताः न भवेयुः, अपितु शिक्षया तथा च आत्मनिर्भरतया स्वजीवनस्य निर्णयान् स्वतन्त्रतया कर्तुं समर्थाः भवेयुः इति क्रान्तिकारी दृष्टिकोणः स्पष्टतया दृश्यते।

**६. तुलनात्मकविश्लेषणम्**

**६.१ शिक्षाक्षेत्रे तुलनात्मकमध्ययनम्**

सावित्रीबाई फुले तथा पण्डिता रमाबाई उभे अपि नारीशिक्षां नारीसशक्तीकरणस्य मूलाधारं मन्येते स्म। सावित्रीबाई फुले बालिकानां विद्यालयीशिक्षायाः प्रसाराय विशेषं कार्यं कृतवती। तस्याः कार्यस्य प्रमुखः उद्देश्यः बालिकानां कृते शिक्षायाः द्वारम् उद्घाटयितुम् आसीत्। अपरञ्च, पण्डितारमाबाई तु नारीणां, विशेषतः विधवानां तथा च सामाजिकदृष्ट्या वञ्चितानां नारीणां, शिक्षायाः दिशि महत्त्वपूर्णं कार्यम् अकरोत्। अतः उभयोः कार्ये शिक्षा समानः आधारः आसीत्, किन्तु लक्षितसमूहे कार्यपद्धतौ च भेदः आसीत्।

**६.२ सामाजिकसुधारक्षेत्रे तुलनात्मकमध्ययनम्**

सावित्रीबाई फुले सामाजिकसमतायाः तथा च जाति-लिङ्गाधारित-भेदभावस्य विरोधस्य दिशि कार्यम् अकरोत्। तस्याः समाजसंस्कारकार्यस्य परिधिः व्यापकः आसीत्। किञ्च, पण्डिता रमाबाई तु विशेषतः स्त्रीणां सामाजिकस्थितेः, विधवानां क्लेशानां तथा च नारीजीवनस्य वैषम्यस्य विषये ध्यानं समाहितवती। तया समाजपरिवर्तनाय संस्थात्मक-कार्यस्य मार्गः अपि स्वीकृतः।

**६.३ महिलाधिकारक्षेत्रे तुलनात्मकमध्ययनम्**

उभयोः कार्ये नारीणां सम्मानस्य तथा च समतायाः भावना प्रमुखा आसीत्। सावित्रीबाई फुले शिक्षायाः तथा च सामाजिकसमतायाः माध्यमेन नारीणाम् अधिकार-जागरूकतां समर्थितवती। अपरञ्च,

पण्डिता रमाबाई नारीणां, विशेषतः वञ्चितानां तथा च विधवानां कृते शिक्षा, आश्रयः तथा च पुनर्वासस्य माध्यमेन प्रतिष्ठापूर्ण-जीवनस्य अवसरं निर्मातुं सततं प्रयत्नं कृतवती।

**६.४ स्वावलम्बनम् एवं आत्मसम्मानः**

अनयोः द्वयोः नारीसमाजसंस्कर्त्रीयोः दृष्टौ नारी न केवलं परिवारस्य आश्रिता भवेत्, अपि तु स्वकीयजीवनस्य निर्णयेष्वपि सक्षमा भवेत्। सावित्रीबाई फुले शिक्षायाः माध्यमेन नारीणाम् आत्मविश्वासं वर्धयितुं सततं प्रयत्नं कृतवती। अपरञ्च, पण्डिता रमाबाई शिक्षया सह व्यावहारिकसशक्तीकरणस्य तथा च पुनर्वा-सस्य पक्षं सुदृढम् अकरोत्।

**७. तयोः योगदानयोः साम्यम् एवं वैषम्यम्**

**साम्यम्**

सावित्रीबाई फुले तथा पण्डिता रमाबाई इति द्वयोः योगदानयोः प्रमुखानि साम्यानि अधोलिखितानि सन्ति-

१. उभे अपि नारीशिक्षायाः समर्थिके आस्ताम्।
२. उभयोः कार्यस्य केन्द्रे नारीणां सामाजिक-उन्नतिः आसीत्।
३. उभे अपि सामाजिक-कुरीतीनां विरोधं कृतवत्यौ।
४. उभे अपि नारीणाम् आत्मप्रतिष्ठायाः समर्थनम् अकुरुताम्।
५. उभयोः दृष्टौ शिक्षा नारीसशक्तीकरणस्य प्रमुखं साधनम् आसीत्।
६. उभयोः कार्ये समाजसंस्कारस्य भावना स्पष्टतया दृश्यते।

**वैषम्यम्**

सावित्रीबाई-फुलेमहोदयायाः कार्ये बालिकाशिक्षा, सामाजिक-समता तथा च वञ्चित-वर्गाणाम् उन्नतिः विशेषरूपेण दृश्यते। अपरञ्च, पण्डितारमाबाई-महोदयायाः कार्ये तु विधवानाम्, वञ्चितनारीणां, नारीशिक्षायाः तथा च पुनर्वासस्य पक्षः विशेषतया प्रमुखः आसीत्। अतः तयोः लक्ष्येषु साम्यं विद्यमानम् आसीत्, किन्तु कार्यक्षेत्रे, लक्षितसमूहे कार्य-पद्धतौ च भेदः आसीत्।

**८. आधुनिकसमाजे तयोः योगदानस्य प्रासङ्गिकता**

अद्यतनसमाजे नार्यो शिक्षायाः, व्यापारस्य, राजनीतेः, प्रशासनस्य तथा चान्येषु क्षेत्रेषु प्रगतिं कुर्वन्ति। तथापि सर्वेषु सामाजिकवर्गेषु समानरूपेणावसरा उपलब्धा न सन्ति। बालिकाशिक्षा, आर्थिकात्म-निर्भरता, लैङ्गिकसमानता, सामाजिकसुरक्षा तथा चाधिकार-जागरूकता इत्यादयो विषया अद्याप्यतीव महत्त्वपूर्णाः सन्ति।

अस्मिन् सन्दर्भे सावित्रीबाई-फुले तथा च पण्डिता-रमाबाई इत्येतयोः कार्यम् आधुनिकसमाजाय प्रेरणादायकम् अस्ति। सावित्रीबाई-फुले-महोदयायाः नारीशिक्षा-विषयकं कार्यम् अद्यापि बालिकानां गुणवत्तापूर्णशिक्षायाः आवश्यकतां स्मारयति। पण्डिता-रमाबाई-महोदयायाः कार्यं वञ्चितनारीणां शिक्षां, पुनर्वासं तथा च आत्मनिर्भरताम् इत्येतयोः महत्त्वं प्रकाशयति। आधुनिककाले नारीसशक्तीकरणाय केवलं शिक्षाप्रदानं पर्याप्तं न भवति। शिक्षया सह आर्थिकात्मनिर्भरता, अधिकारजागरूकता, सामाजिकप्रतिष्ठा तथा च निर्णयप्रक्रियायां सहभागिता अपि आवश्यकाः वर्तन्ते। एतादृशे प्रसङ्गे तयोः योगदानम् अत्यन्तं प्रासङ्गिकम् अस्ति।

**९. उपसंहारः**

सावित्रीबाई फुले तथा च पण्डिता रमाबाई भारतीयनारी-सशक्तीकरणस्य इतिहासे महत्त्वपूर्णे समाजसंस्कर्त्र्यौ स्तः। उभयोः जीवनकार्यं नारीशिक्षा, समाजसंस्कारः, नारीणां प्रतिष्ठा, अधिकार-जागरूकता तथा च नारीसशक्तीकरणम् इत्येतैः विषयैः सम्बद्धम् आसीत्। सावित्रीबाई फुले बालिकाशिक्षायाः प्रसारं तथा च सामाजिकसमतायाः समर्थनं कृत्वा नारीसशक्तीकरणस्य सुदृढम् आधारं निर्मितवती। अपरञ्च, पण्डिता रमाबाई तु विशेषतः विधवानां तथा च वञ्चितनारीणां शिक्षायै, पुनर्वासाय तथा च आत्मनिर्भरतायै संस्थात्मकप्रयत्नान् अकरोत्। तुलनात्मकदृष्ट्या अवलोकयतोः ज्ञायते यद् उभयोः कार्यस्य मूलाधारः शिक्षा तथा च समाजसंस्कारः एवासीत्। तयोः कार्यपद्धतिषु तथा च केन्द्रितसमूहेषु भेदः आसीत्, किन्तु नारीणां प्रतिष्ठापूर्णम् आत्मनिर्भरं च जीवनं निर्मातुं तयोः प्रयत्नः समानदिशि एवासीत्। अतः सावित्रीबाई फुले तथा च पण्डिता रमाबाई इत्येतयोः योगदानस्य तुलनात्मकम् अध्ययनं भारतीयनारीसशक्तीकरणस्य ऐतिहासिक-विकासं ज्ञातुम् अतीव महत्त्वपूर्णम् अस्ति। तयोः कार्यं वर्तमानसमाजे नारीशिक्षायाः, सामाजिकसमतायाः, नारीअधिकाराणां तथा च आत्मनिर्भरतायाः महत्त्वं पुनः स्मारयति। शिक्षा, समता, अधिकार-जागरूकता तथा च आत्मनिर्भरता-एते नारीसशक्तीकरणस्य प्रमुखाः आधाराः सन्ति। तयोः जीवनकार्यम् एतान् आधारान् व्यावहारिकरूपेण प्रकाशयति।

**१०. सन्दर्भग्रन्थाः**


1. Keer, Dhananjay. ‘Mahatma Jotirao Phooley: Father of Indian Social Revolution’. Popular Prakashan.
2. O’Hanlon, Rosalind. ‘A Comparison between Women and Men: Tarabai Shinde and the Critique of Gender Relations in Colonial India’. Oxford University Press.
3. Kosambi, Meera. ‘Pandita Ramabai: Life and Work’. Oxford University Press.
4. Kosambi, Meera. ‘Crossing Thresholds: Feminist Essa-ys in Social History’. Permanent Black.
5. Phule, Savitribai. ‘Kavya Phule’. Government of Maha-rashtra.
6. Ramabai, Pandita. ‘The High-Caste Hindu Woman’.
7. Forbes, Geraldine. ‘Women in Modern India’. Cam-bridge University Press.
8. Kumar, Radha. ‘The History of Doing: An Illustrated Account of Movements for Women’s Rights and Feminism in India’, 1800-1990. Kali for Women.
9. Chakravarti, Uma. Rewriting History: ‘The Life and Times of Pandita Ramabai. Zubaan’.
10. Deshpande, G. P. (Ed.). ‘Selected Writings of Jotirao Phule’. LeftWord Books.